यद्यपि तत्तदर्थदुर्विज्ञेयत्वात् स्पष्टज्ञानार्थं तत्तत्कर्म्म कर्त्तुञ्च प्रयोगरीत्या प्रयोगपारि-जात-प्रयोगरत्न-संस्कारकौस्तुभ-संस्कारमयूख-संस्कारभास्कर-ज्योतिर्निबन्धमार्त्तण्ड मुहूर्त्तमार्त्तण्ड-निर्णयसिन्धु प्रवरमञ्जरी-प्रवराध्यायादिग्रन्था बहव सन्ति तथापि प्रयोगरत्नादिग्रन्थेषु भाविशुभाशुभफलाना सङ्क्षेपेण कथन कृतम् । तथा तात्कालिकग्राह्य-तिथिवारादिकमप्यस्ति । एव संस्कारकौस्तुभादिग्रन्थेषु तिथ्यादिफलाना विस्तारो मन्त्राणा चोद्देशोऽप्यस्ति इत्येकेनैव ग्रन्थाधारेण सकलकर्म्म कर्त्तु विज्ञातुञ्च साकल्येन न शक्यते । तदा सकलपूर्व्वोक्तग्रन्थावलोकनमवश्य सम्भाव्यते । इत्येकस्मिन् ग्रन्थे तिथ्यादिफलाना विस्तार । अन्यस्मिन् ग्रन्थे मन्त्रेतिकर्त्तव्यता-विस्तारोऽस्ति । एव कस्मिन् ग्रन्थे एकमधिकमेकमल्प चास्ति । यथा यत्र कूपोदके पानार्हतास्ति तत्र स्नानोपयोगो नास्ति । यत्रोदके सामुद्रे स्नानयोग्यतास्ति, तत्र पानयोगो न भवति, क्षारत्वात् । अस्मिन् वाप्यादिजले स्नान-पानयोग्यतास्ति तत्र अघहरणत्व नास्ति । स्नानपानाद्याचरणक्षमे श्रीभागीरथ्यादितीर्थे एकस्मिन् एव काले सर्व्व भवति ।

तदद्धुनकत्र सर्व्वधर्म्मकर्म्मणा फलोद्देशेन सर्व्व सग्राहयितुञ्च श्रुतिस्मृतिपुराण-सिद्धान्तवचनेन शिष्टसाधुतुष्ट्यर्थं तथा कर्म्मनिष्ठचतुराणा बोधार्थञ्च कर्म्म-कल्पद्रुम-ग्रन्थ क्रियते ।

Then begins the philosophy of Karma

The work was compiled in 1842 under the patronage of Pratāpa Sinha, descendant of Śivaji, known in history as Pratāpa Śiva, who was made Rājā by the English in 1818

4A सोमसूर्य्यवंशोद्भवा राजर्षय स्वकर्म्मनिष्ठा बहवोऽभवन्निति श्रुति-स्मृतिपुराणेषु स्पष्टत सिद्धान्तोऽस्तीति मत्वा सूर्य्यवंशावतसभूतेन शाश्वदान्व वायशिरोरत्नेन नरपतिशार्दूलेन रणरङ्गधीरेण दुष्टारिराजकुम्भविदारणशालिना राजाधिराजसार्व्वभौमचक्रवर्त्तीश्वरेण वैदिकमार्गप्रवर्त्तकेन क्षात्रकर्म्मधर्म्मतत्व-प्रविदुषा ब्रह्मक्षत्ररहस्यविदा क्षत्रियकुलावतसेन श्रीमत्प्रतापसिंहवर्म्मणा नित्य-नैमित्तिकमासिकवार्षिकेति चातुर्विध्यकर्म्मणा निष्कण्टकः पन्था करणीय इत्या-देशितम् । अत श्रीमत्परमहसपरिव्राजकाचार्य्यश्रीमन्महाभारतीतीर्थश्रीमत्-सद्गुरुसदानन्दस्वामिचरणपङ्कज रसास्वादभ्रमरीभूतेन श्रीमद्विष्णनान्त करणसम्

२८ २९ ३० ३१ ३२ ३३ ३४ ३५
अव्ययाद (?) भूतदया क्षान्ति अनसूया शुचित्व अनायास माङ्गल्य अकार्पण्य
३६
निष्पृहा अष्टचत्वारिंशत्संस्कारा गौतमेनोक्ता । आश्वलायनादिभिस्तु तदतिरिक्ता विष्णुबलिमारभ्य षोडशोपसंस्काराश्चोक्ता । ते च शरीरशुद्धिद्वारा द्विजत्वार्थम् । एव सति एवञ्च द्विजात्यसिद्ध्यर्थ गौतममतानुसारिपूर्व्वोक्ता संस्कारा द्वादश । तथा विष्णुबलिप्रभृतिषोडश इत्येव अष्टविंशति संस्कारा शरीरशुद्धये द्विजत्वप्राप्तये च बहुग्रन्थकृद्भिर्विहिता सन्ति । तथा गृहस्थाश्रमिणा गृहस्थाश्रमान्तर्गता षट्त्रिंशत् संस्कारा विहिता । एव च सर्व्वं मिलित्वा चतुःषष्टिसंस्कारा त्रैवर्णिके कर्त्तव्या तन्मध्ये अष्टावात्मगुणा । तैर्द्विजत्वार्थ गृहस्थाश्रमार्थञ्च उभयत्र अवश्यम्भाव्यमिति दृश्यते ।, etc , etc , etc

The MS comes to an end with the question of Gottra-pravara

इति चाकरदेवज्ञविरचिते गोत्रत्रयनिर्णय समाप्त ।

The present MS belonged to the library of the author's patron The first leaf bears his seal, which contains the following śloka —

श्रीश्रीदेवीवरप्राप्तसाहराजात्मजन्मन ।
मुद्रा प्रतापसिंहस्य भद्रा सर्व्वत्र राजते ॥

Every other leaf is marked with another seal with the inscription —

मर्य्यादेय प्रकाशते ।

The title-page of the MS contains the following statement —

अथ सत्कर्मकल्पद्रुमप्रारम्भ । षोडशसंस्कार क्षत्रियजाति चे श्रीप्रताप-सिंहच्छत्रपतिंभि स्वारिका सिमु काशि आसडा शके १७६३ ।

प्लवनाम सवत्सरे सुवृत्त १८९८ ।

It bears also the name of the later owner of the MS —

मालवीय पुस्तकालय गोघाट काशी प वालमुकुन्दकर्म्मकाण्डी ।
मालवीयपुस्तकालयप्रकाशक गौघाट काशी ।

1643A

2296 **धर्म्मसिन्धुसारः ।** *Dharma-Sindhu-sāra*

By Kāśīnātha Upādhyāya, son of Ananta Upādhyāya

Substance, country made paper 11 × 5½ inches Chapters are separately paged, the first in 20 leaves, the second in 59, and the first half of the third chapter in 135 Lines, 15 on a page Character, Nagara Appearance, old and worn-out

The last Colophon —

श्रीमत्काश्युपाध्यायसूरिसूनु-यज्ञेश्वरोपाध्यायानुजानन्तोपाध्याय
सूरिसुत-काशीनाथोपाध्यायविरचिते धर्म्मसिन्धुसारे तृतीयपरि
च्छेदे-पूर्व्वार्द्धं समाप्त ।

See L 773 and Burnell 13B

The contents of the first two chapters and the two halves of the third chapter are given in 135A

इत्थ गर्भाधानादुद्वाहान्ता समस्तसंस्कारा सपरिकरा निर्णीता
अस्मिंस्तार्त्तीयपूर्व्वार्द्धे १ ॥

तत आह्निक आचारस्तत आधानादिका॰ प्रकीर्णार्था॰ ॥
शान्ति पौष्टिकमुख्या नित्यनैमित्तिकाश्चोक्ताः ॥ २ ॥
पूर्व्वपरिच्छेदकयो काल सामान्यतो विशेषाच्च
निर्णीत सङ्क्रान्त्यैस्तिथिमासाद्येषु विध्युक्तिं ॥ ३ ॥
नाना पापे प्रायश्चित्तव्यवहारविस्तरश्चापि ॥
उपदानमहादानादिविधिश्चोक्तो मयूखादौ ॥ ४ ॥

श्राद्धविधि सागोत्थशौचनिर्णीती (?) इत्थ संस्कारस्तार्त्तीयकस्योत्तरखण्डेऽग्रे सप्रवक्ष्यते ॥

For the end see L 773

1643B

9466 **दशकर्म्मप्रयोगः ।** *Daśa karma-prayoga*

Substance, country-made paper 10 × 4 inches Folia, 11 Lines, 8 on a page Extent in ślokas 175 Character Nāgara Appearance tolerable Incomplete

1644.

2210. स्मार्त्तप्रयोगपद्धतिः (?) । *Smārtta-prayoga-paddhati*

Substance, country made paper 8½×4 inches Folia, 31 of which leaves 6 12 are missing Lines, 11-12 on a page Extent in ślokas, 720 Character Nāgara of the 16th century Appearance, discoloured worn out

It begins —

अथ प्रथमे ऋतौ गर्भाधान नाम कर्म्मोच्यते ।

Topics —

2B—इति गर्भाधानम् ।

3B—इति पुंसवनम्, चतुर्थे मासि सीमन्तोन्नयनम् ।

5B—इति जातकर्म्म अथ नामकरणं वक्ष्ये ।

14A—इति महानाम्नी व्रतम् ।

इति महाव्रतोपनिषद्व्रतद्वयम् ।

14B—इति गोदानम् ।

20A—इति समावर्त्तनम् ।

21B—इति मधुपर्कः ।

26B—इति गृहप्रवेशहोमविधि ।

29A—इत्याग्रयणम ।

31B—इति उत्सर्जननामकार्य्यविधि॰ ।

It is a fragment The name of the work is not certain On the obverse of the 1st leaf the name given above has been put

It is a manual of Grhya Ceremonies

1645

6103 कर्म्मकौमुदी । *Karma-Kaumudi*

By Krsnadatta, son of Brahmadatta (Āvasathika)

Substance country made paper 11×4¼ inches Folia 45 Lines 9 on a page Extent in ślokas 900 Character Nāgara Date, Samvat 1765 Appearance, discoloured Complete

A manual for the performance of the Gṛhya rites

For the beginning and the end of the work, see Ulwar Extr No 292

Topics —

4A, इति कुशकण्डिका, 12A, अथ जयाहोम, 17B, इत्यावसथिकब्रह्मदत्तविरचिताया कर्म्मकौमुद्या विवाहपद्धति समाप्ता, 19A, इत्यावसथिकब्रह्मदत्तात्मजब्रह्मदत्तविरचिताया कर्म्मकौमुद्या चतुर्थीकर्म्मपद्धति, 20A, इति पुंसवनम्, 21B, इत्यावसथिक० सीमन्तोन्नयनपद्धति, 23B, इति जातकर्म्म समाप्तम्, इति नामधेयम्, 25A, इत्यन्नप्राशनम्, 28B, इति कर्णवेध, 38B, इत्युपनयनपद्धति, 40B, इति वेदारम्भ, इत्यावसथिक० स्नातकसमावर्त्तनपद्धति समाप्ता ।

Post Colophon Statement —

शुभमस्तु संवत् १७६३ वर्षे श्रावण कृष्ण शुक्रवार ।

1646.

8516 **कर्म्मकाण्डरत्नप्रकाशनिबन्ध** । *Karma-kāṇḍa ratna-prakāśa-nibanda*

By Jagannātha, son of Kālicarana

Substance, country made paper 11½ × 5 inches Folia 371, of which the first is missing Lines 8-10 on a page Extent in ślokas 7600 Character Nāgara Date, Samvat 1962 Appearance fresh

A compilation for the use of a priest, of rules for domestic rites and other religious observances, such as Ṛṣi Pañcamī, Ananta Caturdaśī, Navarāttra and so on It ends with Vṛsotsarga (dedication of a bull in Śrāddha)

It ends —

पृथिवीस्वर्गकल्याण चाप्यागच्छतु मामथ ।
पितुर्मातुश्च श्राद्धाहे आगच्छे मा युवा तथा ।
राजा सोम पितृणाञ्चामृतत्वायामृतप्रद ॥

Colophon —

इति श्रीमन्मध्यायाज्ञिक मालवजातीय-द्विवेदिवाजपेय्युपनामक-कालीचरणात्मज-जगन्नाथकृतो कर्म्मकाण्डरत्नप्रकाशो निबन्ध समाप्तिमगमत् ।

Post Col —

सवत् १८६२ कार्त्तिकशुक्ल १४ शुक्रे इद पुस्तक मालवीयोप-नामक-वचौयपण्डितेन लिखयापित काश्या चौलोचनेश्वरसन्निधौ । विनायकलाललेखक वा खुद ग्राम अथवा जिला वनारस ।

8519

Notes for the use of a priest in 24 batches of leaves, altogether numbering 135

1647.

6104 **प्रयोगतत्त्व ।** *Prayoga-tattva*

By Raghunātha Sūri

Substance, country made paper 11 × 3½ inches Folia 265 of which leaves 262 to 264 and 256 and 257 are missing There are fragments of the two of the missing leaves Lines 10 on a page Extent in ślokas, 8000 Character Nāgarī Date, Samvat 1744 Appearance fresh Complete

Last Colophon —

इति रघुनाथसूरिविरचित प्रयोगतत्त्व समाप्तम् ।

Post Colophon Statement —

सवत् १७४४ वर्षे आश्विन वदि द्वितीया भौमवासरे इद प्रयोग तत्त्व रामदीक्षितसूनु-कवालदीक्षितात्मजेन यागेश्वरदीक्षितेन काश्या मणिकर्णिघट्टे सिद्धेश्वरीदेवीसमीपे लिखित स्वार्थ परोप-कारार्थ देवद्विजप्रसादत । शुभमस्तु । श्रीरस्तु । शिवाय नम । यादृश पुस्तक, etc

Beginning —

गणेशाय नम ।

शक्य यन्न विशेषतो निगदितु ब्रह्मादिवृन्दारकै

स्वान्तध्वान्तनिवारणाय सतत सम्भावित योगिभि ।
ध्यात मन्दरसस्थितेन जगत ससारबन्धच्छिदा
ऽपर्णामानसमोदन तदखिलाधार महो मन्महे ॥
नैजप्रभापटलनिर्ज्जित-कोटि-पौष (?)
लेखेन्द्र-वन्दितमहोज्ज्वलपादकञ्ज ।
प्रालेय-शैलसदुदरपवतात
वन्दे स्मरन्त्रिपथगाञ्चितचारुमौलिम् ॥
अश्विनरसुरवारानन्ददात्री मृडानी
हृतमुनिकुलविघ्ना भक्तवृन्दात्तदोषा ।
दलितदितिजपुञ्जा सर्व्वदात्री सदा मा
सुखयतु जगदम्बा चन्द्रभित्तावतसा ॥
शारदा शरदिन्दुसप्रभा
श्वेतनीरजसस्थिता परा ।
हसवाहनसस्तुता सदा
भावये निखिलार्थदा शिवाम् ॥
स्मृतिप्रणेतृनथ सूत्रकर्त्तृन् तथापरान् भाष्यकृतोऽभिपूज्य ।
प्रयोगसन्दर्भकृतोपि नत्वा प्रयोगतत्त्व चरिकर्मि काश्याम् ॥

सस्क्रियते एभि श्रौतस्मार्त्तकर्मभि पुरुष इति सस्कारास्ते च चत्वारिंश-दित्याहतु सुमन्तुगौतमौ गर्भाधानानवलोभन-पुसवन-सीमन्तोन्नयन-बलि-जात-कर्म्म-नामकरण-निष्क्रमणान्नप्राशन चौलोपनयनमहानाम्न्यादिव्रतचतुष्टयसमावर्त्तन-पाणिपीडन-देवपितृ-मनुष्यभूतब्रह्मसज्ञकपञ्चयज्ञानुष्ठानानि तथा पाकयज्ञसस्था अग्न्याधेयमष्टकापार्व्वणश्राद्धे श्रावण्याग्रहायणी चैत्र्याश्वयुजी चेति तथा सप्त-हविर्यज्ञसस्था अग्निहोत्र दर्शपौर्णमासौ चातुर्मास्यान्याग्रयणेष्टि निरूढपशुबन्ध सौत्रामणीति सज्ञास्तथा सप्तसोमसस्था अग्निष्टोमोऽत्यग्निष्टोम उक्थ षोडशी वाजपेयोऽतिरात्र आप्तोर्याम इति सज्ञा -इत्येते (त्ये) चत्वारिंशत् सस्कारा ।

Colophons —

5B, इति श्रीरघुनाथसूरिविरचिते प्रयोगतत्त्वे सस्काराख्य प्रथम तत्त्वम्, 18B, ०परिभाषाख्य द्वितीय तत्त्वम्, 26B,

०स्वस्तिवाचनाख्य तृतीय तत्त्वम्, 43A, ०आभ्युदयिकाख्य चतुर्थ तत्त्वम्, 82B, ०ग्रहमखाख्य पञ्चम तत्त्वम्, 99B, ०रजस्वला-शान्त्याख्यं षष्ठ तत्त्वम्, 104A, ०गर्भाधानाख्य सप्तम तत्त्वम्, 106B ०पुंसवनाख्यमष्टम तत्त्वम्, 109B, ०सीमन्ताख्य नवम तत्त्वम्, 113A, ०विष्णुबलिसूतिकागृहप्रवेशाख्य दशम तत्त्वम्, 116A, ०जातकर्म्माख्य एकादश तत्त्वम्, 120A, ०षष्ठीपूजाख्य द्वादशं तत्त्वम्, 161A, ०जातकशान्त्याख्य त्रयोदश तत्त्वम्, 163A, ०दत्तकपुत्रपरिग्रहाख्य चतुर्द्दश तत्त्वम्, 166A, ०नाम-करणाख्यं पञ्चदश तत्त्वम्, 169A, ०षोडश तत्त्वम्, 172A, ०प्रोषितान्नप्राशनाख्य सप्तदश तत्त्वम्, 173B, वर्द्धापणाख्य अष्टादश तत्त्वम्, 184A, ०चौलाख्य एकोनविंशतितम तत्त्वम्, 203A, ०उपनयनाख्य विंशतिम तत्त्वम्, 207A, ०वेदारम्भाख्य-मेकविंशतिम तत्त्वम्, 208A, ०केशान्ताख्य द्वाविंशतिम तत्त्वम्, 213B, समावर्त्तनाख्य त्रयोविंशतितम तत्त्वम्,

Then we have the last colophon, quoted above

The authorities quoted and consulted —

3B, याज्ञवल्क्य, मनु, यम, 4A, अङ्गिरा, हारीत, 5A, आश्वलायन, स्मृत्यर्थसार, 5B, मार्कण्डेय, 6A, वैजवाप, वामनपुराण, वशिष्ठ, 7A, छन्दोग-परिशिष्ट, 8A, कात्यायन, गृह्यपरिशिष्ट, 8B, परिशिष्ट, त्रिकाण्ड-मण्डन, 9A, ब्राह्मे, 9B, बौधायन, मण्डन, 10B, पैठीनसि, कारिका, 12B, भविष्ये, पराशर, 13A, लिङ्गपुराण, 14A, बह्वृचपरिशिष्ट, व्यास, विष्णुधर्म्मोत्तर, 15B, गरुडपुराण, 19A, रूपनारायणीये, हेमाद्रौ, 27B, कालादर्शे लौगाक्षि, बह्वृचकारिका, शातातप, 28B, गालव, हेमाद्रौ श्राद्ध, पृथ्वीचन्द्रोदये, गारुडे, वृद्धवशिष्ठ, 30A, आश्वलायनकारिका, 30B, मार्कण्डेयपुराणे, 31A, मात्स्ये, विष्णु, चतुर्विंशतिमते, वृद्धपाराशरे, 32A, अपरार्क, छागलेय, 33B, चन्द्रिकाया प्रचेता॰, 34B, ब्रह्मपुराण, शाङ्ख्यायन, 43A, स्कान्दे, 44A, गर्ग, 47A, पारिजात, 57B, हेमाद्रौ गरुडपुराण 61A, प्रतिष्ठासार, 62A, अनन्तभट्ट, 63A, कृत्यरत्नाकर, 70A, गृह्य-संग्रह, 83A, स्मृतिरत्न, 83B, देवरात, नारद, 99A, श्रीधर, वृद्धवशिष्ठ-

संहिता, 100A, सवर्त्त, 102A, देवजानीय, माधवीय, 105B, वराह, नृसिंह, सत्यव्रत, 106A, तैत्तिरीयश्रुति, पारस्कर, 107A, ज्योतिर्निबन्धे भृगु, 107B, हारीत, 113B, बृहस्पति, 114A, मिताक्षराया प्रजापति, 115B, कारिका, जयराम, 120A, बलिमन्त्रप्रयोगसार, 120B, कालगुणोत्तरे, 140A, विधानमाला, 141A, प्रयोगपारिजाते, 161B, पारिजाते शौनक, 162A, माधवाचार्य्य, कालिकापुराण, 163B, नारदीय, गोभिलसूत्रे, ज्योतिर्निबन्धे गर्ग, श्रीधर, 164B, स्मृतिसंग्रह, 181A, स्मृतिदर्पण, 184B, मैत्रेयसूत्रे, 201A, राजमार्त्तण्ड, 201B, हरदत्त, पराशर 215B, विश्वरूपनिबन्धे, 216B, सुमन्तु, 218B, अमर, 225A, विज्ञानेश्वर, 233A, ज्योतिर्विवरण, भट्टकारिकाया, 239A, सिद्धान्तशेखर, 254B, रेणुदीक्षितगङ्गाधरौ, 258A, ज्योति प्रकाश ।

The latest authorities quoted are those of the 14th century, and the fact that the work, although compiled at Kāsī quote none of the works of Kāsī, of the 16th or 17th centuries, shews that the author must have preceded them There is nothing to shew that Ananta Bhatta, quoted in leaf 62A, is the author of Vidhāna Pārijāta

1648

417 **प्रयोगचूडामणिः ।** *Prayoga cūdā mani*

For the MS see L 1396

A very rare work It appears to be complete

It ends thus —

विवाहहोमे प्रक्रान्ते यदि कन्या रजस्वला त्रिरात्र दम्पती स्याता (साधा) पृथ[क्] शय्यासनाशनौ चतुर्थेऽहनि सस्नातौ तस्मिन्नग्नौ यथाविधीति जुहुयादिति विशेष ।

इति विवाहे अशौचनिर्णय ।

Post Col Statement —

सवत् १८१७ विश्रुतिनामसवत्सरे दक्षिणायने मार्गशीर्षमासे तद्दिने समाप्तम् ॥

लीखित काश्या मध्ये ब्राह्मणसीताराम जोशी गुजर गौड ।
श्रीरामाय नम । रामतिग सागसाग ।

1649.

1673B A compilation of Smrti

Substance country made paper 11×4 inches Folia 155 Lines 11 on a page Extent in slokas 4340 Character Nāgara Date Sam 1620 Appearance very old Incomplete

Post Col —

संवत् १६२० समये वैशाखशुक्लाष्टम्या शुक्रे पौष्यदेशे डुम्बरीयार-
ग्रामे फतेखानभुज्यमानराज्ये लेखकपाठकश्री अजयीतेन लिखित
पुस्तक । ४००० । शुभमस्तु । श्रीरामचन्द्राय नम ।

In the margin 8778 in a different hand

On the obverse of the 1st leaf —

१५५ गर्भाधानाद्यष्टौ सस्कारा निबन्ध ।

On this page there is an attempt, though not complete, at a table of contents of some sort

It begins —

अथाष्टसस्कारा । तत्र गर्भाधान । तत्र मनु ।
वैदिकै कर्मभि पुण्यै र्निषेकादि द्विजन्मनां ।
कार्य्य शरीरसस्कार' पावन' प्रेत्य चेह च ।

याज्ञवल्क्य ।

ब्रह्मक्षत्रविश शूद्रा वर्णा भवाद्यास्तु ये द्विजा । (?)
निषेकाद्या श्मशानान्तास्तेषा वै मन्त्रत' क्रिया, etc

The authorities consulted in this book are generally Rsis and Purānas The only modern authority consulted is 'गौडा or गौडनिबन्ध' as in leaf 74*a*

गौडनिबन्धे तु ।

नमस्ते सर्वदेवाना वरदासि हरिप्रिये ।
या गतिस्त्वत् प्रपन्नाना सा मे भूयात्तदर्चनात् ॥

and in leaf 70A

गौडा आवाह्नादौ सर्व्वत्र मन्त्रान् पठन्ति ।

in leaf 65B

गौड़ा —अभिषुप्ते जनार्द्दने पञ्चम्या भवनाङ्गने
पूजयेत् मनसादेवी स्नुहीविटपसंस्थिताम् ।
मनसा देवी विषहरी ॥

The customs referred to the Gaudas are still prevalent in Bengal

Leaves 1, 88, 89 to 94 are written in a different hand

1650.

6384

Substance, country made paper $6\frac{1}{2}\times4\frac{3}{4}$ inches Folia, 70 of which fol 51 is missing Lines, 11 on a page Extent in ślokas, 850 Character, Nāgara Date Samvat 1732=Śaka 1597 Appearance old and discoloured Complete

A manual for the performance of different sacraments There appears no definite title in the body of the manuscript

Beginning —

श्रीगणेशाय नम ।

ॐ प्राणायाम ।
ॐ सुमुखश्चैकदन्तश्च कपिलो गजकर्णक ।
लम्बोदरश्च विकटो विघ्ननाशो विनायक ॥
धूम्रकेतु र्गणाध्यक्षो भालचन्द्रो गजाननः ।
द्वादशैतानि नामानि य॰ पठेच्छृणुयादपि ॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
सग्रामे सकटे चैव विघ्नस्तस्य न जायते ॥

26A, इति दामोदरपद्धति अथ सम्पादनविधि —अथ पराशरपद्धतौ अथ॰-सम्पादनम्, 31B, इति दानसकल्प , 36A, इति शान्तिपटल समाप्तम् 38B, इति नान्दीश्राद्धम्, अथ स्तम्भप्रतिष्ठा 40A, अथ विवाह , 53B, इति विवाह अथ अरुन्धती अर्घ , 56B, इति चतुर्थीकर्म्म , 59B, इति चूडा-

कररणाकर्म्म , अथ व्रतबन्ध' , 65A, इति व्रतबन्ध , 69A, इति समावर्त्तनम्— इति व्रतविसर्ग समाप्त —अथ आसादशौयविशेष , (Last Col) इति आसादशौयम् ।

Post Colophon —

सवत् १७३२ शके १५६७ आषाढसुदि १ भौमे तद्दिने पुस्तक समाप्तम् ।

1651

452 **पुनरुपनयनप्रयोग ।** *Punar upanayana-prayoga*

Substance country-made paper 9¼ × 4 inches Folia, 2 Lines, 10 on a page Extent in slokas 40 Character Nāgara Appearance, old Complete

Beginning —

श्रीगणेशाय नम ।

अथ पुनरुपनयनमुच्यते । पारिजाते शातातप ।

लसुन गृञ्जन अग्ध्वा पलाण्डु च तथाशुन ।

उष्ट्रमाहिषमेकेभाश्व रासभीक्षीरभोजनात् ॥

उपायन पुन कुर्य्यात् तत्र कृच्छ्र चरेन्मुक्त । इत्यादि

End —

अन्वाधान चतुर्दश्या परत सोमदर्शनात् ।

इद पुस्त वैजनाथेन ॥

1652.

6559 **यज्ञोपवीत-पद्धतिः ।** *Yajnopavita-paddhati*

By Yugalakisora Vyāsa

Substance, country made paper 8½ × 6 inches Folia, 3 Lines, 11 on a page Extent in slokas 25 Character, modern Nāgara Date Samvat 1959 Appearance, fresh Complete

Colophon —

इति सारवविप्रेण श्रीमद्दि[व्ये]श्वेश्वर-कनिष्ठसूनुणा देवविद्यालयाध्यक्षेण पाठकोपाह्व-श्रीयुगलकिशोरव्यासेन निर्म्मिता यज्ञोपवीतपद्धति समाप्ता ।

Beg —

इद विष्णुरित्यस्य मेधातिथि ऋषि र्विष्णुर्देवता गायत्रीच्छन्दा
ग्निमध्ये विष्णवावाहने विनियोग ।

1653.

2727

Substance, country-made paper 8×4¼ inches Folio 5 Lines 16 on a page Character, Nāgara Appearance, discoloured

Five leaves of some work on Samskāras

Begins -

वस्त्र च श्रोत्रियाय निवेदयेत् ।
गोदान भूमिदान च स्वर्णदान विशेषत ॥
इति गोचरप्रकरणम् ।
अथ सस्कारप्रकरणम् ।

Topics —

आद्यरजोदर्शनकाला, अथ पुसवन, अथ रजोदर्शनस्नानम्, अथ गर्भाधानम्, अथ सीमन्त, अथ सूतिगृहनिर्म्माणप्रवेशौ, अथ प्रसूतौ शान्तिप्रयोजकानि, अथ मूलपुरुष अथाब्दपूर्त्ति, अथ चौल, अथ कर्णवेध ।

1653A

2322 **उपनयनकारिका ।**

For the MS and the work see L 2662 and 3285

It contains 21 kārikās in the anustup metre on upanayana or the investure with the holy thread

1653B

7915 **विवाहप्रकरण ।**

Substance country-made paper 8½×3¾ inches Folia, 38 Lines 9 on a page Extent in slokas, 600 Character Nāgari Date Samvat 1847 Appearance discoloured Complete

Colophon —

इति विवाहप्रकरणं समाप्तं ।

Post Colophon —

संवत् १८४७ फाल्गुनमासे शुक्लपक्षे अष्टम्यां तिथौ सूर्यवासरे नन्दनको लिखत पुस्तकं ।

A priest's manual for marriage ceremony, written in a scribbling and illegible hand

1653C.

6218 विवाहपद्धतिः ("वेदोक्तकर्मनिर्णयां")।

By Yugal Kisora Pāthaka Vyāsa, son of Viśveśvara

Substance country made paper 11¼×5 inches Folia 16 Lines, 11 per page Extent in slokas, 450 Character Nāgara of the nineteenth century Appearance fresh Complete

Beginning —

श्रीगणेशाय नमः ।

याज्ञवल्क्यं मुनिं नत्वा कात्यायनमुनिं तथा ।

श्रीवामानन्दशर्माणं गुरुं शिष्य दयाकरम् ॥

The object of the work —

वेदोक्तकर्मनिर्णयं वर्णानां हितकाम्यया ।

विवाहपद्धती रम्या प्रकटीक्रियते मुदा ॥

व्यासोपनाम्ना विप्रेण श्रीविश्वेश्वरसूनुना ।

युगलप्राक्किशोरेण पाठकेनानुजेन च ॥

तत्रादौ वाग्दानं कृत्वा विवाहदिनात् पूर्व्वं कन्यापिता गणेश पूजनपूर्व्वकं स्वस्तिपुण्याहवाचन-मातृकापूजनायुष्यजपनान्दीश्राद्ध-ग्रहशान्त्यादीनि कर्माणि विधायोद्वाहेह्नि सुलग्ने सुमण्डपे विवाहं कुर्य्यात् ॥

End —

वेदाग्निग्रहभूयुक्ते माघमासे सिते तिथौ ।

त्रयोदश्यां शुक्रवारे समाप्तोद्वाहपद्धति ॥

अत्रोपयुक्ता ये मन्त्रा ये दृष्टा वास्तुकर्मणि ।

सत्सुते सुप्रतिष्ठया' सर्व्वेष्वपि बुधै सदा ॥ (?) ॥

Colophon —

इति श्रीविवाह प० ।

1653D

2047 गर्भाधानम् ।

Substance, countiy-made papei 9¼×4 inches. Folia, 4 Lines, 7 8 on a page Extent in ślokas, 75 Character Nāgara Date Śaka 1717 Appearance, faded Prose

It begins —

रजोदर्शनात् षोडशाहोरात्राणि ऋतु तन्मध्ये आद्य रात्रि-चतुष्कपर्व्वादिनिषिद्धदिनादि वर्जयित्वा मघामूलादिव्यतिरिक्ते दैवज्ञोक्ते शुभे काले दम्पत्योश्चन्द्रानुकूले गर्भाधान कार्य्यम् ।

It ends —

गर्भाधानस्याकरणात् तस्या जातस्तु दुष्यति ।

अज्ञात्वा गा द्विजे दत्वा कुर्य्यात् पुसवन पति ।

Colophon —

गर्भाधान समाप्त ।

Post Colophon —

शाके १७१७ राक्षसनामसवत्सरे चैत्र वद्य ४ तद्दिने भिकूदेवेन लिखितम् ॥

1654

6303 अतिक्रान्तसंस्कारविधिः । *Atikranta saṃskāra-vidhi*

Substance, countiy made papei 9×6 inches Folia, 12 Lines, 9 on a page Extent in ślokas, 132 Character, modern Nāgara Appearance, fresh Complete

Beginning —

अथातिक्रान्तसस्कारविधि ।

देशकालौ स्व गोत्र शर्म्मा अस्य कुमारस्य गर्भाधानादिचौला-

न्ताना संस्काराणा कालातिपत्तिदोषपरिहारेण अधिकारसिद्धि-
द्वारा श्रीपरमेश्वरप्रीत्यर्थं इमानि दशगोनिष्क्रयपूतद्रव्याणि ब्राह्म-
णेभ्यो दातुमहमुत्सृजे—

अथ यज्ञोपवीतप्रयोग —

6B, इत्युपनयन समाप्त अथ वेदारम्भ । 8A, इति वेदारम्भ —तत षोडशवर्षस्य केशान्त संस्कार-कृत्य तत ।—अथ समावर्त्तनम ।—11B, इति समावर्त्तनम्—(Then a list of things required for upanayana) 12A, श्रीस्नात[क]स्य नियमान् वक्ष्याम ।—12B (Last colophon) इति स्नातकस्य नियमा ।—

1655

5892 **कुशकण्डिका-कल्पलता ।** *Kuśa-kaṇḍikā-kalpalatā*

By Śivānanda Dīkṣita, son of Ādāra, son of Mukunda

Substance country made paper 11×5 inches Folia, 42 In Tripathi form Character Nāgara Date Samvat 1937 Appearance fresh To the end of the 4th stavaka The 20th leaf is missing

The beginning of the Text —

श्रीगणेशाय नम ।

गौरीपुत्र नमस्कृत्य गुरु माखनमिश्रकम् ।

कुशकण्डिका स्पष्टीकृता शिवानन्देन धीमता ॥

The beginning of the commentary —

नत्वा श्रीवेदमूर्त्तीन् ऋग्यजुष च तथा सामगाथर्व्ववेत्तॄन्

तत् तत् सूत्रप्रकाशानखिलमुनिवरान् गृह्यकारास्तथैव ।

सर्व्वान् बौधायनादीन् प्रणिपतति जगद्यज्ञसाङ्गत्वहेतो

दृष्ट्वा चावश्यकर्म्माण्यखिलमुनिवरान् सम्मतान् सविलोक्य ॥

वक्ष्ये कल्पलता लतासु वितता कुशकण्डिकाया विधौ

कालेन प्रतिपुष्पिता च कलिता विद्वन्मन -प्रेरिता ।

+ + + कालसग्रह निजकरे कृत्वातिदृष्ट्वा भ्रमात्

+ + स्वादु विलोकिताधरपुटे कृत्वा सुधावत् पिब ॥

(?) यद्दारा परिपूर्णपूरितगिरा विद्वत् सभान्तर्गता
तद् गोष्ठीष्ठविचारणावयवतो श्रीवेदमूर्त्ति प्रभु ।
देवी दीनक्षतादरा विधिविदोचान्येपि ये पण्डिता
तस्मात् सर्व्वविलोकितव्यमखिल ग्रन्थ नवीन त्विद ॥
यद्यपीह बुधोन्नीता ग्रन्था सन्ति पर शत।
तथापीह विशेषोऽय पण्डितैस्तद्विविच्यताम् ॥
नत्वा हरिहरावादौ शिवानन्देन धीमता।
कुशकण्डिकाया वितता बृहत् कल्पलता मता ॥

इह निर्विघ्नपरिसमाप्तिप्रचयपरिपन्थिप्रत्यूहनिवर्हध्वसार्थ आचार्य्य शिष्टाचारपरिप्राप्त खेष्टदेवतास्तुतिरूपमङ्गल विधाय विद्वद्वरहिताय ग्रन्थादौ निबध्नाति। गौरी पुत्रमिति।

The commentary ends —

एषा कल्पलता नाम सर्व्वकल्याणकारिणी ।
ता विलोक्य द्विजो नित्य कर्म्मकाण्डे न मुह्यति ॥

Colophon —

इति श्रीमद्दीक्षितमुकुन्दशर्म्मात्मज-आडार-शर्म्मसूनु-दीक्षित-शिवानन्दशर्म्मविरचिताया कुशकण्डिकाकल्पलताया ब्रह्मोपवेशनादि पर्य्युक्षणान्तकर्म्मविवरण नाम चतुर्थस्तवक ॥ ४ ॥

Post Colophon —

समाप्त शुभ सवत् १९३७ मी जेठवदी ३ वार बुधके लीषा। राम।

The authorities consulted —

3A, कुण्डसिद्धि-कुण्डोद्योत-कुण्डार्क-कुण्डकौमुदी-कुण्डकला-होमकुण्डकल्पलता-कुण्डभास्कर-कुण्डार्णव-कुण्डतत्व-कुण्डमार्त्तण्ड-कुण्डनिर्णय-कुण्डमनोहर-प्रभृति-कुण्डमण्डप-ग्रन्थेभ्यो सक्षेपे किञ्चिदुच्यते।

3B, क्रियासार, वायवीयसहिता, 4A, प्रयोगचिन्तामणी, गृह्यपरिशिष्ट, 4B, पारस्करसूत्र, आश्वलायनपरिशिष्ट, सस्कारचिन्तामणि, 5A, प्रयोगचिन्तामणि, 5B, स्मृत्यर्थसार, प्रयोगपारिजात, 6A, पारस्करसूत्र, 6B, याज्ञवल्क्य, उशन', देवल, दिवोदासीये, 7A, कात्यायन, 7B, श्राद्ध-

विवेक, प्रयोगरत्न, 7B, कारिकाया, 8A, नारायणभट्टकृतजलाशयोत्सर्ग-विधौ, 8B, सुबोधिन्या, 9B, चन्द्रिकाया, 10A, पुराणे आदित्य, भगवन्त-भास्कर, 10B, गृह्यपरिशिष्टसुबोधिनीभ्याम्, 11A, प्रयोगपारिजातसंग्रहे, नागोजीभट्टोक्ते, 11B, मेधातिथि, 12A, अपरार्क, 12B, वैजवाप, 13A, आपस्तम्ब, आश्वलायन, छन्दोगपरिशिष्ट, 13B, कर्क, 14A, हेमाद्रौ मार्कण्डेय, मिताक्षराया जावालोपि, कात्यायनसूत्र, 14B, बह्वृचसूत्र, कातीयपरि-शिष्टम्, 15A, गौतमसूत्रे, सामवेदे, 15B, मत्स्यखण्डे परशुरामोऽपि, 16B, योगचिन्तामणौ, मोहनमार्त्तण्डे, व्यासेनापि, प्रयोगरत्न, 18B, स्मार्त्ताधाने, हरिहरमते, 19B, सुबोधिन्या, 31A, दानमयूख, निर्णयसिन्धु, कर्म्म-प्रदीप, 36B, लघुकारिका, 37A, श्राद्धविवेककारिकाया।

1656.

5717 मन्त्रार्थदीपिका। *Mantrārtha-dīpikā*

By Śatrughna

Substance, country made paper 10½ × 5 inches Folia, 165 Lines, 8 on a page Extent in ślokas, 2600 Character Nāgara Date, Samvat 1931 and Śaka 1796 Appearance, new Complete

Explanations and uses of the Vedic Mantras. It consists of two parts, Karma Kānda and Jnāna Kānda The author was patronized by Dharmacandra, whose genealogy is to be found in the present manuscript

See L 1936 The opening verse in the present manuscript is the second in the manuscript, noticed by Rājendralāla, and *vice versa* From the third verse begins the long genealogy, wanting in the manuscript noticed by Rājendra lāla

बभूव राजन्यकुलावतंसः पुरा सुशर्म्मा किल राजसिंहः।
निहत्य यो भारतसंयुगेषु चकार भूमिं घरभूमिरक्षा ॥ ३ ॥
तदन्ववाये महनीयकीर्त्ति सुवीरचन्द्र क्षितिप किलासीत्।
चकार य संयुगयज्ञभूमौ पशूनशेषानिव वैरिवीरान् ॥ ४ ॥

तस्मादसौ मण्डनसिन्धुरशेषबन्धु-
रासीत् समस्तजन-गीत-भुजप्रताप ।
श्रीदेवकीतनय-पादरत प्रयाग-
चन्द्र' प्रजानयनरञ्जन पूर्णचन्द्र ॥ ५ ॥

राजा श्रीरामचन्द्र क्षितिपतितिलक क्षौणिचक्रैकभूषा
तस्मादासीच्च दोषाकर इव जलधे शोभमान कलाभि ।
येन क्षौणीधरेण क्षितिपतिनगरे स्थापिता धर्ममार्गा
विद्या कि वानवद्या द्विजवर निवहा शिक्षिता रक्षितास्च ॥ ६ ॥

तेन श्रीधर्मचन्द्र समजनि धरणीपाल-मूर्द्धण्यरत्न
यत्नादाराधित-श्रीपतिपदकमलध्यानधारी धुरीण ।
यस्मिन्नायच्छमाने रणशिरसि धनुर्दण्डमुद्दण्डवीर्य्यं
प्रत्यर्थिक्षौणिपाला क्षणमपि समरे नाशितु सक्षमन्ते ॥ ७ ॥

आदेशादथ राज्ञस्तस्य श्रीधर्मचन्द्रस्य ।
मन्त्रार्थदीपिकेय क्रियते शत्रुघ्नशर्म्मणा सम्यक् ॥ ८ ॥

उवटे मन्त्रव्याख्या गुणविष्णौ ब्राह्मणीयसर्व्वस्वे ।
वेद-विलासिन्यामपि कौशलमीक्ष्य तथापि मे सङ्कि ॥ ९ ॥

पूर्व्वग्रन्थेषु या व्याख्या लिख्यतेऽत्रापि सा मया ।
किन्तु तेषु दुरूह यत् तदत्रातिविशद्यते ॥ १० ॥

स्नानमन्त्रास्तत सन्ध्या मन्त्रा देवार्च्चने तथा ।
श्राद्धमन्त्रास्तथा पश्चात् षडङ्गशतरुद्रियम् ॥ ११ ॥

वैवाहिकादयो मन्त्रा व्याख्यायन्ते क्रमादिह ।
उपोद्घात-प्रसङ्गाभ्या केचिदन्येपि कुत्रचित् ॥

Part I ends in leaf 155B —

इति श्रीमहामहोपाध्याय-श्रीशत्रुघ्नविरचिताया मन्त्रार्थदीपिकाया नव-ग्रहादिमन्त्रव्याख्यानपरिच्छेद समाप्त' ।

अथ ज्ञानकाण्डमिदानी प्रस्तूयते ।

सुशिष्य गर्भाधानादिसस्कारै सस्कृतशरीर अधीतवेद उत्पादितपुत्र यथा-शक्त्यनुष्ठीत(?)मपाप निष्पृह यमनियमवन्त अतिथिपूजापनीतकल्मष मुमुक्षुमुपपन्न पुत्रवत् शिक्षयन्नाह ॐ ईशावास्यमिद सर्व्वं, etc

It is clear that the mantras explained are those belonging to the Yajurveda and to the Sāmveda, as stated in Cat Cat

It ends —

इलायुधेऽमी उवटेऽपि चार्था-
स्ततो विधेयो मयि नावलेप ।
रत्नाकरे किं मणयो न सन्ति
तत समाकर्षति य स धन्य ॥

Last Colophon —

इति श्रीमहाराजाधिराज-श्रीधर्म्मचन्द्रकारित-महोपाध्याय-रघुप्रकृत-मन्त्रार्थदीपिकाया ज्ञानकाण्डव्याख्यान समाप्तम् ।

Post Colophon Statement —

अलमति विस्तरेण । शुभ भूयात् ।
अथ शुभ सवत् १८३१ शके १७८६ ज्येष्ठ शुक्लपञ्चम्या भृगुवासरे इन्द्रप्रस्थमध्य लिपीकृतम् ।

1657

3338 **मन्त्र-कौमुदी ।** *Mantra-kaumudī*

By Rāma Krsna.

Substance country made yellow paper 18 × 3½ inches Folia, 14 Lines, 7 8 on a page Character, Bengali in a modern hand Appearance, fresh A fragment

A collection and explanation of Vedic mantras, employed in the performance of modern religious rites and festivals

For the work see L 1085 and 1048

1658

3012 **स्मार्त्तप्रायश्चित्तानि ।** *Smarta-prayaścittāni*

Substance, country made paper 8½ × 3 inches Folia 103 Lines, 6 on a page Extent in slokas 927 Character, Nāgara of the early nineteenth century Appearance, discoloured Incomplete at the end

A treatise on expiations and purifications according to Smrti work The MS being incomplete, the author's name is not ascertainable

It begins —

श्रीगणेशाय नम ॥

अथ स्मार्त्तप्रायश्चित्तानि लिख्यन्ते। तत्रादौ पञ्चहोम-निर्णयोऽभिधीयते। तदाह मरीचि

शरीरापद्भवो यस्य भयादर्त्ति प्रजायते।

तथान्यास्वपि वापत्सु पञ्चहोमो विधीयत इति ॥

The authorities quoted and consulted —

1, मरीचि, त्रिकाण्डमण्डन, 2A, सग्रह, 2B, स्मृत्यर्थसार, 2B, प्रयोगचन्द्रिकाकार, 3B, स्मृतिभास्कर, शौनक, 6A, प्रजापति, चन्द्रिका, 13B, कारिका, 15A, स्मृतिरत्नावली, 28A, प्रयोगरत्न, 28B, चन्द्रचूडीये, 33A, ऋग्विधाने, 33B, हेमाद्रौ पितामहः, पराशरमाधवीये कात्यायन, 34B, स्मृतिचन्द्रिका, 36A, इति कृष्णभट्टीये, 37B, मनु, 38A, कात्यायन, 42A, सस्कारकौस्तुभ, 43A, विश्वप्रकाश, 44B, बृहस्पति, 45B, गोभिलवचनात्, 50A, रुद्रदत्त, 50A, रामाण्डार, 50B, प्रायश्चित्तप्रदीप, सस्कारकौमुदीकार, बौधायन, 74B, कौस्तुभे च, 75A, प्रयोगपारिजाते, 87B, कर्म्मान्तसूत्रे उक्तम्।

The topics —

6A, इति पञ्चहोम ॥ अथात्यशक्तश्चेत् समस्यहोम, 8B, इति शेष होम, अथ चन्द्रसूर्य्यग्रहण-प्रायश्चित्तम्, 10B, इत्यन्वाधानेष्टिमध्ये ग्रहण-प्रायश्चित्तम्—अथ उपासनाग्न्यनुगत-प्रायश्चित्तम्, 12B, अन्वाधानोत्तर कुत्रचित् यजमानस्यागत्य प्रयाण-निमित्तानि कर्म्माणि तु, 13A, अथ उपासन-होमलोपे तु, 22B, अथाग्रयणकरणस्य नवान्नप्राशने तु, 26A, अनाहुतिरूप हविस्कन्दने तु, 29A, पञ्च महायज्ञलोपे तु, 31B, सर्व्वेषा महायज्ञाना दशाह द्वादशाह वा लोपे, 32A, सप्तपाकसस्थाना मध्ये अन्यतमस्याकरणे प्रायश्चित्तमाह प्रजापति, 37B, अथेदानी जातकर्म्मादि सस्कारा+काले अकृतसस्कारस्य असस्कृतस्य तु विशेषमाह मनु, 39B, बहुधर्म्मलोपे तु,

स्नातकव्रतलोपे तु, 40A, अथ मेधाजननात् पूर्व्वमुपनयनाग्निनाशे प्रायश्चित्त-प्रयोग, 42A, इति सस्कारकौस्तुभोक्त-उपनयनाग्निनाश-प्रायश्चित्त-प्रयोग। अथ विवाहोत्तर उपासनारम्भात् प्रागग्निनाशे तु। 48A, इत्याशौचे नित्यहोम-विधि, अथेदानी पिण्डपितृयज्ञे उद्धृत-उल्मुकादि-प्रणीताग्निनाश-प्रायश्चित्त-मुच्यते, 49B, अत्र स्त्रीरजस्वला चेत्तत्र निर्णय, 51B, अथ परिस्तरणादाहे प्रायश्चित्तम्, 52B, अथ सायप्रातर्होमकालातीतप्रायश्चित्तम्, 73B, अथ पुरुषस्यैव प्रवासकाले कर्त्तव्यम्, 75B, अथेदानी काम्यस्थालीपाकानि लिख्यन्ते, 78B, इति पुत्रकामस्थालीपाकप्रयोग, 82A, इति सज्ञानीस्थालीपाक-प्रयोग। अथ मित्रविन्दा मन्त्रावैराजेष्टि, 85A, अथ वर्षकामेष्टि कारी रेष्टि, 89B, इति स्वस्त्ययनी-स्थालीपाकप्रयोग, 90A, अथापराग्नेयी स्थाली-पाकप्रयोग', 92A, मृधीस्थालीप्रयोग, 97B, इति भेदकामस्थालीप्रयोग, 99B, अथेदानीमत्र प्रसगात् स्वसूत्रेऽनुक्तत्वात् काम्येष्टिरभिधीयते।

1659.

6201 **अनादिष्टप्रायश्चित्तम्।** *Anādista-prāyaścittam*

Substance, country made paper 6½ × 4 inches Folia, 4 Lines, 8, 9 on a page Character Nagari of the nineteenth century Appearance discoloured

Expiations for belated sacraments for a Brahmana boy

Beginning

श्रीगणेशाय नम॰।

आचार्य्य उपनयनात् पूर्व्वदिने वटुना सह मङ्गलस्नात प्राणा-नायम्य तीर्थ्यादि सकीर्त्त्य अस्य कुमारस्य गर्भाधानादि चौलकर्म्मा-न्ताना सस्काराणा कालातिपत्ति दोषपरिहारद्वारा श्रीपरमेश्वर-प्रीत्यर्थ प्रतिसस्कारे पादकृच्छ्र चौलाकरणे अर्द्धकृच्छ्रात्मक-प्रायश्चि-त्तम् कार्षापणात्मक-गोनिष्क्रये प्रत्याम्नायेन करिष्ये। मम कुमारस्य गर्भाधानादि-चौलकर्म्मान्ताना सस्काराणा कालातिपत्ति-दोषपरि-हारद्वारा श्रीपरमेश्वरप्रीत्यर्थ अनादिष्ट-प्रायश्चित्तहोम करिष्ये।

3B, अस्य कुमारस्य द्विजत्वसिद्ध्या वेदाध्ययनाधिकारार्थ उपनयनमद्य करिष्ये।

4B, ,एव ० तिथौ गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्म्म-नामकरण-निष्क्रमणान्नप्राशनचौलकर्म्मान्ताना संस्काराणा कालातिपत्तिदोषपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रतिसंस्कारे पादकृच्छ्र चौलाकरणे अर्द्धकृच्छ्र द्रव्य प्रत्याम्नायेन ब्राह्मणद्वारा आचरिष्ये अस्य कुमारस्योपनयनाधिकार-सिद्धिद्वारा श्रीपरमेश्वर-प्रीत्यर्थं कृच्छ्रत्रयात्मक प्रायश्चित्त द्रव्य प्रत्याम्नायेन करिष्ये। अस्य कुमारस्य गाय-त्र्यधिकारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं अयुतगायत्रीजप ब्राह्मणद्वारा करिष्ये। अस्य कुमारस्य कामवाद-कामाचार-कामभक्षण-दोषपरिहारद्वारा श्रीपरमेश्वर-प्रीत्यर्थं कृच्छ्रत्रयात्मक प्रायश्चित्त ब्राह्मणद्वारा करिष्ये।

Here ends the MS

1660.

2969 **ग्रहमखप्रयोगः** । *Graha makha-prayoga*

For the manuscript and the work see L 4071

On the details of the rites for the propitiation of the nine planets

1661.

6316

One leaf—12×5 inches—with 18 lines in all

Containing a list of things required in *Smārthādhāna* (स्मार्त्ताधानसामग्री संस्कारक पत्र)

Copied in Samvat 1941

शुभ संवत् १९४१ सुमार— बालमुकुन्देन लिखापित।

1662.

3270 **सामप्रयोग-मधुपर्कः** । *Sāma-prayoga-Madhuparka*

Substance, country made paper 8¼×3½ inches Folium, one Lines, 13 in all Extent in slokas, 10 Character, Nāgara in a modern hand Appearance, fresh

Colophon —

इत्यस्य सामप्रयोग-मधुपर्कं।

The mantra for offering Madhuparka, or, honey, ghee and curd

1663.

5070 A कालाहुतिः । *Kālāhuti*

Substance, palm leaf 13½×1 inches Folia, 6 Lines, 4, 5 on a page Character, Uḍiya of the sixteenth century Appearance, old and discoloured Incomplete at the end

Beginning -

अथ यजमान-प्रायश्चित्तानि लिख्यन्ते ।

कालाकृति-पूर्व्वकमेतत्-दीक्षितोऽमनोज्ञस्वप्न यदि पश्येत्तदा पर्य्या-वृत्ते दु:स्वप्नादवभूत्यै ब्रह्माहमन्तर करवै पुन स्वप्नमुखाकधीति जपेत् ।

2B, इति सौमिक्य' कालाकृतय समाप्ता., 6A, इति सोमकालाकृतय ।

The MS breaks off abruptly

There are nine leaves more, relating to expiations for defects in the performance of a sacrifice

1664.

2484 दशशान्तिः । *Daśa-śanti*

Substance, country made paper 9×4 inches Folia, 4 Written on one side only except on the 1st leaf Lines, 6 to 9 on a page Character Nāgari of the nineteenth century Appearance, fresh

Called दश शान्ति' on the left hand upper margins of the first two leaves

The benedictory texts

प्र नो मित्र· प्र वरुण ० १, सहनाववतु सहनौ भुनक्तु ० २, यश्छन्दसा-मृषभो विश्वरूप ० ३, ॐ अहं वृक्षस्यरेरिवा ॥ कीर्त्ति पृष्ठ ० ४, ॐ पूर्णमद पूर्ण मिद ० ५, ॐ आप्यायन्तु ममागानि वाक् प्राणश्चक्षु श्रोत्र ० ६, वाङ्मे मनसि प्रतिष्ठिता ० ७, ॐ भद्रन्नो अपिवातय मन ॥ ॐ शान्ति ० ८, ॐ भद्र कर्णेभि ० ९, ॐ यो ब्रह्माण विदधाति ० १०, ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्या-सप्रदायक-र्त्तिभ्यो वशकर्तृभ्य ०, ११

अथ उत्तरशान्ति प्रारंभ· ॥ प्र नो मित्र प्र वरुण ० १, ॐ अतिक-

स्यायाश्चपत्ताम्नित्यकल्यायासश्रयात् ० २. ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा०
Then the seven verses ज्ञानं परमगुह्यं मे, etc, etc, contained in the चतुःश्लोकीभागवतम in No 2476

These are the sacred benedictory texts, of which, the vedic ones are ten in number

1665.

2193 प्रतापनारसिंह वा संस्कारप्रकाश ।

Pratāpa-Nārasimha or Samskāra-prakāsa

This is a Devanāgarī manuscript very old in appearance measuring 8×5 inches It is worm-eaten throughout—even in the leaves restored—greatly damaged and defective

It has two paginations The first ends in leaf 25 with the colophon —

> इति प्रतिष्ठान-पुरवासि-तोरोनारायणात्मज-रुद्रदेवकृते प्रताप-नारसिंहाख्ये संस्कार-प्रकाशे विदुष प्रति स+से ब्रह्मागन्दी पञ्चत्यनुस्त्रय उपासनाभिमन्त्र यजमान प्रति तादृश विधुर प्रति च प्रयोग ।

And the second ends in 74th leaf which contains the colophon —

> इति प्रतिष्ठान-पुर्वासी तोरोनारायणात्मजरुद्रदेवकृते प्रताप-नारसिंहाख्येसंस्कारप्रकाशे यतिसंस्कारे उपयोगिनिर्णय समाप्त सपूर्णम् शके १७१८ नल-नामाब्दे ।

Of the second pagination the first 8 leaves were restored, of which 4 and 7 are missing The mark of the leaf after the 8th leaf restored, is lost in pasting The next leaf is numbered 9 Thence the old marks continue up to 38, of which 16 to 20 and 23 to 25 are missing Then, the leaf after 38 is corroded in both the right hand and left hand sides, and the leaf mark is lost Then 4 restored leaves which are doubly paged 1 to 4 and 38, 39, 40, 41 Then

we have the original leaf marks from 40 to the end, of which again 62 to 67 are missing

The manuscript contains only one section of Pratāpa Nārasimha—that on the ordination of a hermit, as directed in *Brahmānandī paddhati*

It begins —

अथ सन्न्यासकर्त्तारं ब्रह्मानन्दीयपद्धतिमनुसृत्य प्रयोगमन्वमुच्यते । तत्रादौ उपासनाग्निमन्त्र यजमान प्रति तादृच्च-विधुर प्रति च प्रयोग । तत्रादौ नि स्पृह सर्व्वत्र शान्त इत्यादि लक्षणै युक्त गुरु सबोध्य . . .

उदगयनादौ प्रशस्ते काले सन्न्यासमाचरेत् ।

Leaf 1 of the second pagination begins —

अथ यतिसंस्कार ।

सिध्य + + + पुत्रादिशिष्यो वा स्नात्वा अधिकारसिद्धार्थं वपन कृत्वा कृच्छ्राचरणं कुर्यात् । तत्र सकल्प । करिष्यमाणयतिसंस्कारे अधिकारार्थं कृच्छ्रत्र-यात्मकप्रायश्चित्त कृच्छ्रमेकैक-गोनिष्क्रय-द्रव्यद्वारा अहमाचरिष्ये ।

So the first gives the rules for the renunciation of the world by one who keeps the sacrificial fire called *aupāsana* or by a widower keeping the same sacrificial fire, and the second treats of the severe austerities to be practised for getting oneself qualified for the order of Sannyāsins

1666.

2208

Substance, country made paper 9½ × 4½ inches Folia, 35 Lines, 9 on a page Extent in ślokas 980 Character, Nāgara Date, Śaka 1751 Appearance, worm eaten

It contains a number of works on the ordination of a Sannyasī

I *Colophon* —

22B, इति प्रतिष्ठानपुरवासी तोरोनारायणात्मज-रुद्रदेवकृत-प्रतापनारसिंहाख्यसंस्कारप्रकाशे विदुष प्रति सन्न्यासस्य ब्रह्मान-

न्दीयपद्धत्यनुसृत्य उपासनाग्निमन्त यजमान प्रति तादृश विधुर प्रति च प्रयोग ।

For this work see the preceeding number It agrees with the first part

II Colophon —

49A, इति ब्रह्मानन्दीयप्रकरणे यतिसंस्कारे संस्कारोपयोगी निर्णय समाप्त ।

For the end of the work see L 13 But the colophons differ

It begins —

तत्र अनाहिताग्निविषये विशेष तत्र श्रौताग्नयो विच्छिन्नाश्चेत् पुनराधाना × कृत पूर्णाऽङ्कत्यन्त कृत्वा प्रायश्चित्तादि कुर्य्यात् ।

Topics —

27A, अथ केवल-प्राजापत्येष्टि अथ बौधायनानुसारि-वैश्वानरेष्टि-प्रयोग , 30A, अथ प्राजापत्येष्टि , 33A, इति त्रेताग्निकर्तृक प्रति प्रयोग 33A, कपिलोक्त-प्रयोग , 34A, अथातुर-सन्न्यासो निरूप्यते , 35B, इति आतुरसन्न्यासप्रकार , 36B, इत्यङ्गिरसोये आतुरसन्न्यासप्रकार , 38B, इति षट्पञ्चाशद्देवता· 42A, इति व्यासपूजाविधि , अथात्र इतिहास , 42B, इति श्रीविष्णुधर्म्मोत्तरे दाल्भ्यविष्णुसंवादे व्यासपूजाविधावितिहास समाप्त । अथ यतिसंस्कारे किञ्चिदुपयोगिनिर्णय तत्र यम , 49A इति ब्रह्मानन्दीय-प्रकरण यतिसंस्कारोपयोगी निर्णय समाप्त· ।

III Col —

53B, इति यतिसंस्कार-कारिका समाप्ता ।

इति तोरोनारायण-ब्रह्मानन्दीय-सन्न्यासपद्धति समाप्ता ।

It begins —

अथ यतिविषये स्मृतय· ।

सन्न्यासो ब्रह्मण· स्थान वैराग्यात् प्रकृतौ लय ।

ज्ञानात् कैवल्यमाप्नोति तिस्रस्ता गतय· स्मृता ॥ विष्णु ॥

The Post Col —

नववसुगजचन्द्र विक्रमादब्दसखे १८८९ ।
नुगघ्नरनगचन्द्रे १७५४ शालिवाहात् समौचे ॥
हिमगिरिभवतौथ्या मार्गशीर्षसिताया ।
अलिखदिह सैन्ये मोद्गलि मयुरेश ॥
मालौनी कृत ।

स १८८९

After the Post Col Statement there is, in a different hand, another short treatise entitled कलिसतरणोपनिषत्.

After the Yajurvedic Santipatha the Upanisad begins

द्वापरान्ते नारदो ब्रह्माणं प्रति जगाम कथ नु भगवो गा पर्य्यटन् कलि सतरेयमिति स होवाच ।

साधु पृष्टोस्मि सर्व्वश्रुतिरहस्य गोप्य तच्छृणु येन कलि सतरिष्यसि । भगवत आदिविष्णोर्नामेति ।

Col —

इति कृष्णयजुर्वेदे कलिसतरणोपनिषद समाप्तम ।

On the left hand upper corner of every leaf, there is written स० प०, which is the abbreviation of Sannyāsa-paddhati

On the obverse of the first leaf —

अथ तोरोनारायणाकृत-सन्यासपद्धति लिख्यते ।

On the reverse of the last leaf —

इति सन्यासपद्धति समाप्तम् ।

1667.

2975 **सन्यासपद्धतिः ।** *Sannyāsa-paddhati*

From Pratapa-Nārasimha by Rudradeva Bhatta, son of Toro Nārāyana

Substance country made paper 10×4½ inches Folia, 26 Lines, 13, 14 on a page Extent in slokas, 1000 Character, Nāgara Date, Samvat

1835 Appearance, old and discoloured Complete in 26 leaves The 14th and 15th are missing

See L 43, which describes the work under the name of *Yatisamskāra*, the funeral rites to a Yati, which forms the last of the topics

It clearly follows Brahmānanda's work on the subject and quotes very often Bahvrca Parisistha and Smrtyarthasāra

Topics —

10A, इति प्रतिष्ठान-पुरवासी तोरोनारायणात्मज-रुद्रदेवकृते प्रतापनारसिंहे सस्कारप्रकाशे विदुष प्रति सन्न्यासो ब्रह्मानन्दीय-पद्धत्यनुसृत्य उपासनाग्नि मन्त यजमान प्रति तादृश विधुर प्रति च प्रयोग ।

12A, अथ बौधायनानुसारी वैश्वानरेष्टिप्रयोग ।

23A, इति बौधायन-शौनक-यमस्मृत्यनुसार्य्याचारानुगृहीतो-नारायणबलिप्रयोग ।

24A, इति नागरखण्डानुसार्य्याचारानुगृहीत आराधनाप्रयोग ।
अथ यतिसस्कारे किञ्चिदुपयोगिनिर्णय ।

The last Colophon —

इति प्रतिष्ठानपुरवासी तोरोनारायणात्मज-रुद्रदेवकृते प्रतापनारसिंहाख्ये सस्कारप्रकाशे यतिसस्कारे उपयोगिनिर्णय ।

Post Col —

सवत् १८३५ वैशाख शुक्लैकादश्या काशीनाथेन ।

1668.

2988

Substance, country made paper 9¾×4½ inches Folia, 19 Lines, 9 on a page Extent in slokas, 360 Character, Nāgara Appearance, discoloured Date, Samvat 1863 Appearance, discoloured Complete

All the leaves of the MS contain the abbreviation स प apparently for सन्न्यास पद्धति or सन्न्यास प्रयोग But it relates to the obsequial rites for a hermit

It begins —

गजानन तथा साव शिव ससारमोचनम् ।
आश्वलायनमाचार्य्य मातर पितर तथा ॥
विश्वेश्वरगुरु चापि प्रणिपत्य यथाक्रमम् ।
विरक्ताना च सन्न्यासप्रयोगस्तु निरूपित ॥
इदानी यतिसस्कार शास्त्ररीत्या निरूप्यते ।
तत्र बौधायन । यतिसस्कारविधि व्याख्यास्याम ॥

First it explains the obsequial rites, then gives the details of their performance, from the burial to the last ceremony on the 12th day

8A, इति यतिसंस्कारप्रभृति-आराधनान्तोपयोगि-निरूपणम् ।

19B, *the last Colophon* —

इति नागरखण्डानुसार्य्याचार्य्यानुग्रहीते आराधनप्रयोगः ।

Aradhana means the worship of the Yati on the 12th day from his death.

7B, एकादशेऽह्नि पार्व्वणश्राद्ध द्वादशेऽहनि आराधनमिति यतिसस्कार पद्धतौ ।

It ends —

ब्राह्मणानाहूय पादप्रक्षालनपूर्व्वक गन्धादिभिरभ्यर्च्य भोजयेत् ।

The Post Colophon Statement :—

सवत् १८६३ ज्येष्ठ वद्य ४ भौमवासरे काश्यां आचार्य्योपनामक-
शम्भुनाथेन लिखित स्वार्थ परार्थ च ।

1669.

3286 सन्न्यासपद्धतिः । *Sannyāsa-paddhati*

Substance country made paper 6¼×4¼ inches Folia—the first sixteen leaves are missing and the remaining leaves 14 in number, are numbered on the left hand upper margin from 17 to 30 and on the right hand lower margin from 1 to 14 Lines, 9 on a page Character, Nāgara of the nineteenth century Appearance, discoloured

Topics —

1B or 17B, यते सिद्धि प्राप्तस्य एकादशेऽह्नि पार्व्वण तत्र प्रयोग , 2B or 18B, पुत्रादन्य' शिष्य कर्त्ता चेत् नद्यादौ यज्ञोपवीती एव आत्मान तर्पयामि . . गृहमेत्य प्राणानायम्य देशकालौ स्मृत्वा ब्रह्मीभूतस्य गुरो' प्रत्यब्दादि-श्राद्धाधिकारसिद्धर्थ्यं [पार्व्वणश्राद्ध करिष्ये इति सकल्प्य , 4B or 20B, ततो द्वादशेऽह्नि नारायणबलि कुर्य्यात् । तत्र प्रयोग एकादशे द्वादशेवेति विहितकाले शुचि स्नात्वा देशकालौ सकीर्त्त्य ब्रह्मीभूतस्य गुरो सिद्धिदिनादारभ्य द्वादशे वेति विहितकाले शुचि स्नात्वा देशकालौ सकीर्त्त्य ब्रह्मीभूतस्य गुरो सिद्धिदिनादारभ्य द्वादशेऽहनि विष्णु-केशवादि-द्वादशरूपिणो गुरो सम्भावितसर्व्वपापक्षयपूर्व्वक-विष्णुलोकावाप्तिद्वारा श्रीपरमेश्वरनारायण-प्रीत्यर्थं नारायणबलि करिष्ये इति सकल्प्य , 5B or 21B, अग्न्याधानान्ते समिद्वपनाद्यक्रियमाणे नारायणबलिहोमे देवतापरिग्रहार्थमन्वाधान करिष्ये, 9A or 25A, अथ वै पुरुषो नारायणो कामयतीत्यादिकानौपनिषद्भागान् श्रावयेत् , 12A or 28A, नारायणबलिप्रयोग , 12A and 28A, अथ द्वादशाहे वा यथाचार समाराधन , 13A or 29A, अथ प्रकारान्तरेणाराधनविधि , अथ त्रयोदशेऽहनि समाराधनविधिप्रारम्भ ।

The Last Colophon in 14B —

इति सन्न्यासविधि समाप्त ।

1670

6507 यतिपरमहंसाह्निक । *Yatiparamahamsāhnika*

Substance, country-made paper 10×4½ inches Folia, 10 Lines, 9 per page Extent in ślokas, 200 Character, modern Nāgara Appearance fresh Complete

It relates to the daily duties of recluses, called Yati and Paramahansa

It begins —

श्रीगणेशाय नम ।

अथ यतीना परमहंसानामाह्निक लिख्यते ।

स्नान कुर्य्याद्यथाशक्ति यतिर्युक्तः समाहित ।—
तत सतारके काले तल्पमुत्तोल्पसयुत ॥ १ ॥
स्नानार्थं मृदमादाय दण्डञ्चैव कमण्डलु ।
अध्यावलोकयन् गच्छेदनुद्विग्नपदक्रम· ॥ २ ॥
गङ्गातीर समासाद्य पाणिपादौ तु शोधयेत् ।
अथाचम्य सकृत् प्राणानायम्य प्रणमेज्जलम् ॥ ३ ॥
तीर्थाभिवादको दण्डमूलाग्राभ्यामनुक्रमात् ।
अप स्पृशेदभिगमेन्निर्गमे तद्विपर्य्ययात् ॥ ४ ॥

It consists of 141 verses in the anustup-metre

End —

चतुर्द्दशभिरनन्त अत ऊर्द्ध तथैव च ।
प्रवरे सर्व्वलोकाश्च केशामूले व्यवस्थिता· ॥ ४१ ॥
कथित मुनिमुख्यैस्तु चैव दण्डस्य लक्षणम् ॥

इति दण्डलक्षणम् इति आह्निक सम्पूर्णम् ॥

1671.

2707 मण्डलदेवताः । *Mandala Devatā*

Substance, country-made paper $7\frac{1}{4} \times 4\frac{1}{2}$ inches Folia, 8 Lines, 7 on a page Extent in slokas, 50 Character, Nagari of the eighteenth century Appearance, discoloured Complete

Colophon —

इति मण्डलदेवता ।

It begins —

अथ मण्डलदेवता· । तत्र मध्ये ब्रह्मयज्ञान गौ· ॥ तत उदीचीमारभ्य वायवीपर्य्यन्त सोमादयो वाय्वन्ता अष्टौ लोकपाला स्थापनीया· । तद्यथा आप्यायस्व गौतमो गायत्री सोमा उत्तरे ईशाना वा । इत्यादि ।

On the obverse of the first leaf it is called "सर्व्वतोभद्र-मण्डलदेवता".

1672.

2400

Substance, foolscap paper 8½×4½ inches Folia, 2 Lines, 31 on a page Extent in slokas, 50 Character, Nāgara Appearance, discoloured

It contains directions for invoking various deities presiding over various parts of sacrificial circles called Sarvato-bhadra-mandala and Lingato-bhadra-mandala

It begins —

अथ मण्डलदेवता । मध्ये ब्रह्मयज्ञान गौतमो वामदेवो ब्रह्मा त्रिष्टुप् ब्रह्मावाहने विनियोग' ।

2A, लिङ्गतो भद्रे विशेष ।

असिताङ्गाय भैरवाय ० रुरुभैरवाय चण्डभैरवा ०

मण्डले देवताह्वनम् ।

ॐ ब्रह्मणे स्वाहा सोमाय स्वा ० ईशानाय ० इन्द्राय ० till the end It closes with the following words —

स्विष्टकृदादिहोमशेष समापयेत् ।

1673.

6490 (1) **सर्व्वतोभद्रदेवता ।** *Sarvato-bhadra devata*

and

(2) **लिङ्गतोभद्रदेवता ।** *Lingato bhadra devata*

Substance, country made paper 10½×5 inches Folia 6 Lines, 8 on a page Extent in slokas 100 Character Nāgara of the nineteenth century Appearance, fresh, but repaired Complete

(I) 5A, इति सर्व्वतोभद्रदेवता ।

Beginning —

अथ सर्व्वतोभद्रदेवतास्थापनविधिः ।

अथ गुरुसंज्ञावेद्या सर्व्वतोभद्र लिखेत् ।

तल्लेखनप्रकारस्तु हेमाद्रौ स्कान्दे उक्त ।

ततो यजमानान्वित आचार्य्य वेद्या सर्व्वतो-भद्रे मण्डलदेवता[1] स्थापयेत् । तद्यथा —

देशकालौ सङ्कीर्त्त्य अमुक[ा]ग[ङ्गभूत] ब्रह्मादिमण्डलदेवता-स्थापन पूजनञ्च करिष्ये इति सङ्कल्प कृत्वा अक्षतेषु मध्ये कर्णिकाया ॐ ब्रह्मयज्ञान ० भूर्भुव स्व ब्रह्मणे नम ब्रह्माणमावाहयामि स्थापयामि । १ । एवमग्रपि—

(II) 5A, अथ लिङ्गतो-भद्रे देवविशेष । तद्यास्ते पूर्व्वे ॐ नम कृत्वा०, etc , etc

Colophon —

इति लिङ्गतो-भद्रदेवता[ं] समाप्ता ।

After the colophon, there are three lines

1674.

6466 **वारुणमण्डल ।** *Vāruna-Mandala*

Being an extract from Dāmodara Thakkura's work

Substance country made paper 10×4½ inches Folia, 5 Lines, 12 to 15 on a page Extent in slokas, 200 Character, Nāgara of the eighteenth century Appearance old and soiled Complete

Colophon —

इति दामोदरठक्कुरकृत-निबन्धस्थो वारुणमण्डलप्रकार ।

On the drawing of a mystic circle, dedicated to Varuna

Beginning —

श्रीरस्तु ॥

* सङ्क्षेपतो मण्डलकरण दर्शयति । षोडशारमिति । ततस्तत्र मण्डले कर्त्तव्ये अष्टदलात्मकपद्मगर्भ षोडशारचक्र कुर्य्यात् । तस्य परितो मध्यवृत्तक चतुर्मुख चतुर्द्वार चतुरस्र पीठाख्यं कुर्य्यात्, etc , etc

1675.

2669 *The Same*

Substance, country made paper 10¼×5 inches Folia, 3 Lines, 18 on a page Extent in ślokas, 80 Character, Nāgarī of the eighteenth century Appearance, fresh Complete

The MS begins with the enumeration of the deities and their respective positions in the diagram of Varuna, in verses Then it proceeds to explain some tract on the subject of the drawing of Vāruna mandala, of which it quotes *Pratīkas* only The MS contains the diagram also

It begins —

अथ वारुणमण्डल देवतास्थापनम् ।
वारुणे मण्डले लेख्या पञ्चविंशतिकोष्ठगाः ।
मध्यकोष्ठे तु ब्रह्माण सोममुत्तरकोष्ठके ॥ १
शिवमैशानकोष्ठे तु इन्द्र पूर्व्वेऽग्निकोणके ।
अग्निर्याम्ये यम पूज्यो नैर्ऋत्ये निर्ऋतिस्तथा ॥ ॥

The first leaf is taken up with the enumeration of the deities and a figure shewing their respective positions in the diagram

Col —

इति वारुणमण्डलदेवताः ।

2A, *begins* —

वारुणमण्डलव्याख्या । अस्यार्थ । वदेति कर्णिकाकेशरदलाग्रवह्निमण्डलात्मक मण्डल चतुष्टयमित्यर्थः । यत्तु क्वचित् कर्णिकाकेशरदलाग्रवह्निमण्डलरूप मण्डलपञ्चकमुक्त तद्दलदलाग्रयोर्विभक्तदेशज्ञापनार्थ यदा चतुर्हस्तप्रमाणक मण्डल वारुणमण्डल कुर्य्यात् ॥

It ends —

कपोलाः कोणैककोष्ठरूपा प्रत्येक यथाशोभ त्रिवर्णभूषित. कार्य्यः वाह्ये सर्व्वापेक्षया वह्नि ।

Col —

इति वारुणमण्डलव्याख्या समाप्ता ।

The last leaf contains the diagram

On the obverse of the first leaf there are two figures under the heading —

एकोनपञ्चाशत्पद इन्द्रवास्तुमण्डलं पञ्चमं ।

1676

6256 *The Same*

Substance, country-made paper $8\frac{1}{2} \times 4\frac{1}{2}$ inches Folia, 2 Lines, 9 on a page Extent in ślokas, 30 Character, modern Nāgarī Dated Saṃvat 1927 Appearance, fresh Complete

On the drawing of the mystic diagram sacred to Varuna

Beginning —

श्रीगणेशाय नमः । अथ षोडशारं लिख्यते ।— चिह्नस्त चतुरस्रं साधयित्वा प्रागपरदक्षिणोत्तराभिर्नवरेखाभिः तदेव चतुःषष्टिपदं कुर्यात् । तानि च पदानि प्रत्येकं नवनवाङ्गुलानि सम्पद्यन्ते । ततो वहिरन्त्यपङ्क्तिषु चतुर्दिक्षु पार्श्वयो कोष्ठकोणात् इष्ट द्वय द्वय त्यक्त्वा मध्यकोष्ठानि चत्वारि मार्ज्जयित्वा तदुपरिपङ्क्तिषु चतुर्दिक्षु पार्श्वयो' कोष्ठकोणात् त्रय त्यक्त्वा प्रतिदिशं मध्यकोष्ठद्वय द्वय मार्ज्जयेत् । तेन चतुर्दिक्षु षट् षट् पदानि चत्वारि द्वाराणि सम्पद्यन्ते ।

Colophon —

इति इदमेव वारुण मण्डलमित्युच्यते ।

Post Colophon —

संवत १९२७ श्रावणमासे कृष्णपक्षे द्वितीया गुरुवासरे बालमुकुन्देन लिखितं ॥

1677.

9281–9282

Substance, country-made paper 8×5 inches Folia, 5 (5–9) Lines, 10 on a page Extent in ślokas, 50 Character, Nāgarī Appearance, tolerable Incomplete

